ॐ

# अथ श्री देव्यष्टोत्तरशतनामस्तोत्रम्

| | | | | | |
|---|---|---|---|---|---|
| जगदधीश्वरी | देवि | ज्योतिरूपिणी। | जनविमोहिनी | देवि | जन्ममोचिनी ।१। |
| आशुतोषिणी | देवि | आमयापहा । | आर्तिनाशिनी | देवि | अद्भुतप्रभा ।२। |
| अन्तरार्चिता | देवि | अक्ष्यगोचरा । | अक्षमालिनी | देवि | अक्षयप्रभा ।३। |
| कामरूपिणी | देवि | कामितार्थदा । | कान्तिविग्रहा | देवि | कामपूजिता ।४। |
| काशिकेश्वरी | देवि | कल्मषापहा । | कूटरूपिणी | देवि | कुंकुमार्चिता ।५। |
| कंजलोचना | देवि | कम्रविग्रहा । | काव्यलोलुपा | देवि | कामकोटिका ।६। |
| कचजिताम्बुदा | देवि | कादिरूपिणी । | कौलसेविता | देवि | कौलिनीपरा ।७। |
| चंचलेक्षणा | देवि | चारुविग्रहा । | चक्रधारिणी | देवि | चक्रवासिनी ।८। |
| चण्डिकेश्वरी | देवि | चित्कलानिधे। | चण्डमुण्डहा | देवि | चण्डविग्रहा ।९। |
| तन्त्ररूपिणी | देवि | तापहारिणी । | तारकेश्वरी | देवि | तारकक्षमा ।१०। |
| त्रिपुरमालिनी | देवि | त्रिपुरतापिनी। | त्रिपुरसुन्दरी | देवि | त्रिपुरवासिनी।११। |
| त्र्यम्बकेश्वरी | देवि | त्रिगुणरूपिणी। | त्र्यक्षरीपरा | देवि | त्राहि त्राहि मां १२ |
| दक्षकन्यका | देवि | दक्षिणार्चिता । | दाडिमोपमा | देवि | दिव्यविग्रहा ।१३। |
| पीठरूपिणी | देवि | पापनाशिनी । | प्राणरूपिणी | देवि | पन्नगेश्वरी ।१४। |
| भूमरूपिणी | देवि | फाललोचना । | भण्डदैत्यहा | देवि | भीमविक्रमा ।१५। |
| भार्गवार्चिता | देवि | भास्करप्रभा । | भोगदायिनी | देवि | भोगिनीपरा ।१६। |
| मूलकारिणी | देवि | मूलवासिनी । | मुक्तिदायिनी | देवि | मुक्तिरूपिणी।१७। |
| मोहनाशिनी | देवि | मोक्षमार्गदा । | मांगलाकृति | दैवि | मंजुलप्रभा ।१८। |
| वर्णरूपिणी | देवि | वागधीश्वरी। | वामकेश्वरी | देवि | वांछितार्थदा ।१९। |
| वेदरूपिणी | देवि | वेद्यवर्जिता । | विश्वसाक्षिणी | देवि | विश्वधारिणी।२०। |
| सर्वरूपिणी | देवि | सर्ववर्जिता । | शर्मदायिनी | देवि | शम्भुमोहिनी।२१। |
| सत्यचित्सुखा | देवि | सान्द्रविग्रहा। | संचितापहा | देवि | सद्गतिप्रदा ।२२। |
| साक्षिरूपिणी | देवि | साक्षिवर्जिता। | शिष्टपूजिता | देवि | इष्टरूपिणी ।२३। |
| सिंहवाहिनी | देवि | सिंहविक्रमा । | सिद्धपूजिता | देवि | सिद्धिदायिनी।२४। |
| हरिहरार्चिता | देवि | हेममालिनी । | हंसरूपिणी | देवि | हंससेविता ।२५। |
| ह्रींपदाभिदा | देवि | ह्रींपदप्रिया । | ह्रींनिवासिनी | देवि | ह्रींपरायणा ।२६। |
| विश्वतोमुखी | देवि | वीरपूजिता । | विष्णुरूपिणी | देवि | वैष्णवीपरा ।२७। |
| सत्वरं हर | मम | शोकसंभ्रमं । | सन्मुखे भव | देवि | सन्ततं मम ।२८। |
| जगदधीश्वरी | देवि | ज्योतिरूपिणी। | जनविमोहिनी | देवि | जन्ममोचिनी।२९। |

Created by demo-version of Universal Document Converter. Full version doesn't add this stamp.
WWW.PRINT-DRIVER.COM